National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(56): 234-236
© 2024 NJHSR
www.sanskritarticle.com

**Dr. Anilkumar S**
Associate Professor,
Govt Sanskrit college,
Pattambi, Palakkad,
Kerala

# गदाधर भट्टस्य व्युत्पत्तिवादमधिकृत्य के. रामपिषारटि महोदयस्य बालप्रिया व्याख्या (प्रथमटिप्पण्यां प्रथमो भागः)

**Dr. Anilkumar S, Dr. Sheena.V. J., Sargapriya M. Ashok**

**प्रस्तावना**

महामहोपाध्यायस्य गदाधर भट्टस्य अतिप्रधानः ग्रन्थः भवति 'व्युत्पत्तिवादः'। अस्य ग्रन्थस्य बह्व्यः व्याख्याः सन्त्यपि क्लिष्टाः। परन्तु केरलीयः पण्डितः नैय्यायिकः के. रामपिषारटिः 'बालप्रिया' नामक व्याख्याम् अलिखत्। सा व्यख्या एतावता न प्रसिद्धी कृता। तस्यां व्याख्यायां विषयः सरलया रीत्या प्रतिपादिताः। सा व्याख्या विद्यार्थिभिः सम्यगवगन्तुं शक्यते।

गदाधरभट्टः 1650 ए.डी वर्षे जनिम् अलभत। तेषां पिता जीवाचार्यः आसीत्। सः महानुभावः ईस्ट् बङ्गाल् राज्ये लक्ष्मीपाश जिल्लायां जातः। तेषां महानुभावानां गुरुः प्रसिद्धः नैयायिकः हरिराम तर्कवागीशः आसीत्। तेषां विविधाः व्याख्याः गदाधरी नाम्ना विख्याताः आसन्। तेषां प्रमुखाः ग्रन्थाः-

1. तत्वचिन्तामणि दीधिती प्रकाशिका।
2. तत्वचिन्तामणि व्याख्या।
3. तत्वचिन्तामण्यालोकटीका।
4. मुक्तावलीटीका।
5. रत्नकोशवादरहस्यम्।

अन्ये 13 व्याख्या ग्रन्थाः अपि एतेषां सन्ति।

रामपिषारकः तृप्पूणित्तुरा संस्कृत कलालये अध्यापकः आसीत्। तेषां कालः कलालयस्य सुवर्ण कालः इत्यनेन व्यवह्रियते। बहुपाण्डित्येन ते जनैः विद्यार्थिभिश्च मानिताः आसन्।

तैः अन्येषां ग्रन्थानामपि व्याख्याः कृताः। ताः व्याख्याः अपि पण्डितैः स्वीकृताः। इयं व्याख्या अपि पण्डितैः स्वीकरिष्यते इत्येव मन्ये।

श्रीमत् पूर्णत्रयीशं श्रीसुगमेशञ्चमाधवम्।
गौरीपतिं गुरूंश्चान्यान् स्वद्रुमान्नुवतां नुमः॥
यत्कण्ठतो भातितरामपूर्व्वमणिदीधितिः।
विभुधानां वरेण्यन्तं वन्देश्श्रीमत् गदाधरम्॥
व्युत्पत्तिवादो व्युत्पिपित्सुः ग्राह्याः ख्यातोस्तितस्यच।
व्याख्यासु रामरुद्रीया व्याख्येहाद्यकाकृता॥

रामो बालप्रियां रामपिषारटिना कृता बोधिकां कुर्वे तद्दीयणी अन्यव्याख्यादृष्टा यथामति अभेदतदतिरिक्त शाब्दबोधप्रकारं सपरिकरमुपपादयितु कामः तदुपपादनौपयिकं विशेषजिज्ञासां उत्थापनाय सामान्यनिर्देशमानतोऽत्र।

**शाब्दबोधे चेति** - सप्तम्यन्तार्थस्य शाब्दबोधनिरूपितत्वस्य आश्रयतासम्बन्धेन भास् धातु विषयतायाम् अन्वयः। प्रत्यक्षे भासते[1] इत्यादौ तथा दर्शनात्।

**Correspondence:**
**Dr. Anilkumar S**
Associate Professor,
Govt Sanskrit college,
Pattambi, Palakkad,
Kerala

**एकपदार्थे** - इति सप्तम्यन्तार्थस्य एकपदार्थनिष्ठ विशेष्यत्वस्य अपरपदार्थस्येति षष्ठ्यन्तार्थस्य अपरपदार्थनिष्ठप्रकारत्वस्य च निरूपितत्त्वसम्बधेन संसर्गमर्यादा[2] पदार्थसम्सर्गतायाम् अन्वयः। संसर्गस्य मर्यादा असाधारणाधर्मरूपः स्वभावः स च संसर्गतैव। तृतीयायाः अभेदोर्थः तस्याप्याश्रयतासंबन्धेन भास् धात्वर्थः विषयतायाम् अन्वयः। अनुमितोर्पर्व्वतः विशेषमर्यादया भासते। इत्यादौ तथा दर्शनात् आख्यातार्थः आश्रयत्वम्। तस्यप्रथमान्त संसर्ग्गपदार्थे चान्वयः। तथाच तादृशविषयताश्रयत्ववान् संसर्ग इति तादृशविषयताश्रयत्व विशिष्टसंसर्ग्गत्वरूपसामान्यधर्म्म प्रकारक ज्ञाने जाते तद्धर्मव्याप्यधर्मप्रकारक जिज्ञासोदयेन अभेदत्वादि व्याप्यधर्मावच्छिन्नप्रतिपादनपरः।

**सचेत्यादिग्रन्थः** - संगच्छते। नव्यास्तु अभेदादि सम्सर्गकशाब्द-बुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदविशिष्ठ प्रथमान्तपदत्वादिना आकांक्षायाः कारणतां निरुपयिष्यन् अजिज्ञासिताभिधानस्य उन्मत्त प्रलपित प्रायत्त्वात् प्रथमतः सामान्यरूपेण कार्यकारणभावज्ञान-मन्तरा विशेषणरूपेण कार्यकारणभावजिज्ञासायाः अनुदयेन जिज्ञासाजनक सामान्यनिर्देशमाचरति। शाब्दबोधे चेत्यादि सप्तम्यन्तद्वयस्यषष्ठ्यन्तस्य विषयार्थः पूर्वोक्त एव। तेषां पूर्वोक्तसंबन्धैः संसर्ग्गपदार्थसंसर्ग्गतायाम् अन्वयः। स्वरत्वतः प्रतीयमानेनेतादृशसंसर्गात्वावच्छिन्नस्य संसर्ग्गत्वभिन्नविषयत्वा-श्रयत्वस्य च उद्देश्यविधेयभावेन धनवान् सुखी" व्याप्ति विशिष्टपक्षधर्म्मताविशिष्ट हेतुप्रकारतानिरुपित पक्षविशेष्यताशालि परामर्शजन्यानुमितिः। प्रमेत्यादावुद्देश्यतावच्छेदक धनादिप्रयोज्य-त्वस्य विधेय सुखादौ उद्देश्यतावच्छेदकघटक व्याप्तिपक्षधर्मता प्रयोज्यत्वस्य प्रमात्वरूपविधेये च भानवत् अत्र उद्देश्यता-वच्छेदकघटक एकापरपदप्रयोज्यत्वस्य तज्जन्यतावच्छेदकत्व रूपस्य विधेयभूतसंसर्ग्गतायां भान-सम्भवात् वृत्यप्रयोज्यसं सर्ग्गताशालि शाब्दबुद्धित्वेन पदविशिष्टपदत्वेन च एकसामान्य-कार्यकारण भावस्य तादृशरूपद्वयवन्निष्ठत्वेन विशेषकार्यकारण-भावसामान्यस्य वा अलाभात्तद्व्याप्यरूपेण कार्यकारणभावस्य तद्व्याप्यरूपवन्निष्ठत्वेन वा तस्य जिज्ञासायां तद्व्याप्येन अभेदादि निष्ठसंसर्ग्गताशालि बुद्धित्व समानविभक्तिक विशेषणवाचकपद-विशिष्ठ-विशेष्यवाचकपदत्वा-दिना विशेषण रूपेण कार्यकारण भावप्रतिपादनम् अग्रिमग्रन्थे न संगच्छते। अर्थादन्वितशक्ति-वादमतमपि व्यवछिद्यते इत्याहुः। इति देशिकाचार्याः तत्पत्रे द्रष्टव्याः।

**अनन्तामार्यास्तु** - ननु घटवत् भूतलमित्यादि प्रत्यक्षे घटभूतलसम्योगादेः चक्षुसम्युक्त समवायादिरूप सन्निकर्षबलात् भानस्य व्यापकत्व घटकतया परामर्शविषयताबलात् पर्वतो वह्निमानित्याद्यनुमितौ सम्योगादिभानस्य चोपपत्तावपि, नीलो घट इत्यादौ शाब्दबोधे तादात्म्यादि संसर्ग्गभाने नियामकाभाव इत्यर्थ आह शाब्दबोधेचेत्यादि। यस्त्वर्थ स च प्रत्यक्षादितो वैलक्षण्यं तत्वविशेषणविशेष्यक भासक सामग्रीविशिष्टान्यत्वम्। तस्याश्रयता-संबन्धेन शाब्दबोधेऽन्वयः। शाब्दबोधनिरुपितत्वस्य आश्रयतासंबन्धेन एकपदार्थनिष्ठ विशेष्यत्वस्य अपरपदार्थनिष्ठप्रकारत्वस्यचनिरूपितत्व सम्बधेनसंसर्गमर्यादापदार्थेऽन्वयः।

**संसर्गमर्यादा** - नाम समभिव्याहारज्ञानप्रयोज्य सांसर्ग्गिकविषयता तृतीयार्थश्चाभेदः। तस्य भास् धात्वर्थविषयतायाम् अन्वयः। तादृशविषयताश्रयत्ववान् संसर्ग इति बोधः। समभिव्याहाररूप आकांक्षैव शाब्दबोधे संसर्ग्गभानस्यनियामिकेतिभावः। किं किं संसर्ग्गभानस्य काका आकाम्क्षानियामिकेति जिज्ञासया चोत्तरग्रन्थो-क्तिभीः। नन्वत्र संसर्ग्गतायां प्रकारता[3] विशेष्यता निरूपितत्वयोः अव्यावर्त्ततया किमर्थं तदुक्तिरिति चेद् शाब्दबोधे पदानुपस्थाप्यस्य संसर्ग्गस्य समभिव्याहार प्रयोज्यतया विभानं किमर्थं स्वीकर्त्तव्यं तद्भानस्वीकारेपि क्षतिविरहादिति शङ्कानिरासाय तदुक्तौ प्रकारता निरूपित जिज्ञासायां संसर्ग्गतानिरूपितत्वजिज्ञासया शाब्दबोधे संसर्ग्गता भाने प्रकारताविशेष्यता निरुपकत्वानुपपत्तिः। इति युक्तिसूचनेन तत्र तत्भानस्य आवश्यकत्व सूचनात् एकवस्तुन्य-परवस्तुनः इत्यनुक्त्वा एकपदार्थे अपरपदार्थस्येत्युक्तिः। सम्सर्ग्गस्य पदानुपस्थापितत्वात् कथं शाब्दबोधे भानम् इत्याशङ्कासूचनाय विशेषण विशेष्ययोः पदशक्ति मत्वरूपपदार्थत्व कथनेन सम्सर्ग्गस्य पदाशक्यत्वस्फोरणात्। दक्षिणेन पश्यतीत्युक्तौ वामेन न पश्यतीतिवत्। अत्रैकत्वम्-अपरत्वञ्च किं पदयोर्विशेषणम् इति चेत्, उत पदार्थयोः आहोस्वितपदार्थतावच्छेदकयोः। नाद्यः आख्यातार्थ-कृतिवर्त्तमानत्वाद्योः परस्परान्वयबोधानुपपत्तेः। न द्वितीयः **नीलोघटः** इत्यादौ अभेदान्वय बोधाननुपपत्ते। नापितृतीयः विषयितां जानातीत्यादि तृतीयार्थ विषयितायां प्रकृत्यर्थविषयितायाः अन्वयबोधानुपपत्तेरिति चेन्न। पदार्थशब्दोहि पदनिरुपित वृत्तिमत्परः। एकत्वापरत्वयोश्च वृत्तावन्वयः। घटघटत्वयोः संसर्ग्गीभूत समवायेसमभिव्याहार-प्रयोज्यविषयता विरहेण वृत्तिभेद-कथनस्यावश्यकत्वात्। घटघटत्व-योश्च एक वृत्तिमत्वेन तद्व्यावृत्तेः। जात्याकृतीत्यादि सूत्रेण तयोरेक वृत्तिमत्वस्यबोधनात्। तथा च स्वप्रयोज्यप्रकारतानिरूपित-त्वस्वभिन्नवृत्ति प्रयेज्यविशेष्यतानिरू-पितत्वाद् चित्व्याख्यानम्। तन्न साधु। भ्रमप्रमा साधारण शाब्दबोधमात्रे संसर्ग्गभाननियामकांक्षा-यामुभयसाधारण्येन समाधा-नस्य युक्तत्वेन प्रमास्थलमात्रे तत्कथनस्य अनुचितत्वात्। भ्रमस्थले वह्निमान् **हृद** इत्यादौ विशेषण प्रतियोगिक विशेष्यानुयोगिक सम्बन्धाभानेन तथाविधसम्बन्धकथने भ्रमव्यावृत्तेः। भ्रम निरूपित संसर्ग्गतायामपि विशेष्यता प्रकारता निरुपितत्व सत्वेन अस्मदुक्त व्याख्याने समाधानस्य भ्रमसाधारण्य सम्भवादित्याहुः। वस्तुतः अत्र अन्वयः विंशति वादानुकरण शाब्दबोधे भानेऽपि व्यभिचाराप्रसक्तिं प्रदर्श्य वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्ग्गस्य शाब्दबोधविषय-त्वोपगमे संबन्धभानेनियामकाभावाद सर्वत्र अबाधित यावत् सम्सर्ग्गभानं स्यात् इत्यापत्तिं पुनः प्रदर्श्य कयोश्चित पदयोः केनचित् संबन्धेन स्वार्थान्विय बोधे साकाम्क्षतया आकांक्षा ज्ञानस्यैव पदार्थसंसर्ग्गभाननियामकत्वम् इत्युक्तं भट्टाचार्यैः, शक्तिवादे

व्यवस्थापितमर्थं मनसि कृत्वा विशेष जिज्ञासोत्थापनाय सामान्यतो निर्दिशति **शाब्दबोधेचेत्यादि**। **संसर्गमर्यादया भासते चेति** भोजनाचकारः प्रसिद्धा। शाब्दबोधनिरासाय एकपदार्थनिष्ठा विशेष्यता निरूपिता अपरपदार्थनिष्ठ प्रकारतानिरूपिता या संसर्गता तद्वानिति संसर्ग इत्यन्तस्य पूर्वोक्त एवार्थः संसर्गमर्यादा शब्दस्य रूढ्यसंसर्गस्य मर्यादाप्रतीति नियमरूपा यया इति योगशक्त्या वा आकांक्षेत्यर्थः। तृतीयार्थः, प्रयोज्यत्वं भास् धात्वर्थविषयत्वे तदाख्यादार्थाश्रयत्वे तत् संसर्गपदार्थे चान्वेति। तादृशसंसर्गत्वा-वछिन्नस्य उद्देश्यत्वम् आकांक्षाप्रयोज्य विषयताश्रयत्वस्य उद्देयत्वञ्च बोध्यम्। यद्वा श ाब्दबोध इत्यादिपदत्रयार्थस्य भास् धात्वर्थ विषयतामेवान्वयः। उद्देश्य विधेय भावश्च न विशेष्य विशेषणभाव समनियतः। किन्तु वक्तृबुद्धिस्थितस्य कस्यचित् एव उद्देश्यकत्वस्य कस्यचिदेव विधेयत्वम् इत्युक्तत्वात् यो घटघटत्वयोः संसर्गभूत समवाय निष्ठ विषयतायाम् वृत्तिप्रयोज्यायाम् आकाङ्क्षाप्रयोज्य-त्वाभावात्तद्व्यावर्त्तनायैक पदार्थनिष्ठ विशेष्यता निरूपितत्वापर-पदार्थनिष्ठ प्रकारता निरूपितत्वयोः उपादानमत एव एकत्वमपरत्वञ्च पदस्यैव विशेषणम्। अत एव शक्तिवादे कयोश्चित् पदयोरित्युक्तम्। एकपदेन तद्व्यक्तित्वावछिन्नम्[4] आनुपूर्वीविशेषा-वछिन्नम् वा उपस्थाप्यते। बुद्धिविषयतावच्छेदक[5] त्वेन तद्धर्माणामनुगमः। स्पष्टमिदं अन्यारादिति सूत्रव्याख्यानावसरे। पञ्चमीग्रन्थे अपरशब्देन च तद्धर्मावछिन्न प्रतियोगिताक भेदवान् बोध्यते। यथा पृथिवी इतरेरम्याम्। भिद्यते इत्यत्र इतर पदेन पृथिवीत्वावछिन्न प्रतियोगिताक भेदवत्। पदशब्दस्य चात्र शब्द इत्येवार्थः। **नचैकत्वापरत्वयोः**। पदविशेषणत्वे पचतीत्यादौ कृति वर्त्तमानकालाद्योः यः संसर्गः तन्निष्ठविषयतायाः आकांक्षाप्र-योज्यायाः उक्तोद्देश्यतावछेदकाक्रान्तत्वं न स्यात्। पदभेदाभावात्। **इति वाच्यम्**। इष्टापत्तेः। तत्रैकपदार्थयोः यः संसर्गः तन्निष्ठ विषयतायाः अपि आक ाङ ्क्षाप्रयोज्यत्वस्य स्वीकारात्। अत एव व्युत्पत्तिवैचित्र्यात् एकपदार्थयोरपि परस्परमन्वय इति तत्र तत्र ग्रन्थकारैरुच्यते। तत्र पचादि धातुपदविशिष्ट तिबादिपदत्वरूपकांक्षैव कृविवर्त्तमानकालाद्योः यः संसर्ग तन्निष्ठविषयतायाः अपि प्रयोजिकाः। यतस्तत्र वर्त्तमानकालवृत्ति ः। कृतिरित्येतावन्मात्र विषयको बोध नोल्पत्त्यमानेतिः॥ किन्तु पाकानुकूलं कृतिः वर्त्तमानकालवृत्तिः। इत्याकारक बोध एवोत्पद्यते। एवमेवाकारादि स्थलेपि पदान्तरमादायाका ंक्षा बोध्यम्। प्रत्यक्षादिनिरुपित सम्सर्गताव्यावर्त्तनाय शाब्दबोधनिरुपितत्वस्य चोपादानमित्यल-मधिकेन। **सचेत्यादि** अत्राभेदत्वेन तदतिरिक्तत्वेन च विभागो बोध्यः। **अधारेति** आधाराधेय इत्यादेः प्रत्येकं भावेत्यनेनान्वयादा-धाराधेयभावः प्रतियोग्यनुयोगिभावः विषयविषयिभाव इत्यर्थः। वैयाकरण मतानुरोधेन अयं ग्रन्थः। तन्मतेसम्बन्धो हि सम्बन्धिभ्यां भिन्नोद्दिष्ठ इत्यादि भाष्यात् प्रतियोग्यनुयोगि निष्ठस्यैव आधारता निरूपिताधेयत्वरुपाधाराधेयभावादेः समुदायस्य संबन्धत्वात्। भूतले घटः घटो नास्ति घटज्ञानमित्यादौ क्रमेण तेषां संबन्धेन प्रतीतिरिति विशेषात् वस्तुतस्य संबन्धमाधारत्वा विषयत्वं वक्षयितुञ्चेत्यर्थः तत्र पाक्षीकादित्यादौ लुङो वर्त्तमान ध्वंसो अर्थः तस्य प्रतियोगितासंबन्धेनाख्यातार्थकृतावन्वयः। वक्ष्यते चेदं ग्रन्थकृता। घटो नास्तीत्यादौ अनुयोगिता संबन्धेन घटादेः नञर्थादावन्वयः। पचतीत्यादौ धात्वर्थपाकादेराख्यातार्थ कृतौ जनकता संबन्धेन, राज्ञः पुरुषः इत्यादौ षष्ठ्याद्यर्थ स्वत्वादौ निर ूपितत्वादि सम्बन्धेन राजादेश्चान्वयात्, जनकत्वादेरादिपदेन परिग्रहः। अभेदसंसर्ग-कान्वयबोधः प्रातिपदिकार्थ विशेष्यको धात्वर्थ विशेष्यकश्चेति द्विविधः। तत्राद्योपि व्याससमास्थलभेदेन द्विविधः। द्विविधेप्याक्ये-पृथङ्नियामकमाह अभेदश्चेत्यादि। अत्र शाब्दबोध इत्यस्यानुषंगः अध्याहारो वा। **शाब्दबोध** इत्यादेः। भास् धात्वर्थ ेन्वयः। पूर्ववत् बोध्यः चैत्रस्य सम्बन्ध ादित्यादौ चैत्रपदोत्तरषष्ठ्याः संबत् पदपूर्वं तत् पूर्ववृत्तित्वेपि। तदुपस्थाप्यस्य प्रतियोगितत्वस्य सम्बन्धे अभेदत्वान्वय विरहात् तद्वारणाय स्वाव्यवहित पूर्ववृत्तिना वा पदेन इत्युक्तम्। पदेन इत्यस्य नाम्नेत्यर्थः। स्वाव्यवहित पूर्ववृत्तिनेत्यत्र स्वाव्यवहितपूर्वोत्तरवृत्तिनेति क्वचित् पाठः राजसिंह इत्यादौ सिंहादि पदार्थस्य सिंहसदृशादेः राजादिपदार्थे अभेदान्वयेन उत्तरवर्त्तिनाप्य-भेदान्वयदर्शनात्। स्वाव्यवहितपूर्ववर्त्तिनेति पाठस्तु उत्तरवर्त्तिनोप्यु-पलक्षकः **भासते इति**। तथा च प्रातिपदिकार्थ निष्ठ विशेष्यतानिरुपित शाब्दबोधीयाभेदनिष्ठ विषयता स्वसमानविभक्तिक स्वाव्यवहितापूर्व-वृत्त्यन्यतर पादोपस्थापितार्थ निष्ठ प्रकारता निरूपिता एवेत्यर्थः।

इति रामप्पिषारककृता बालप्रियाव्याख्यायाः प्रथमो भागः समाप्तः (शाब्दबोधे चेति इत्यारभ्य आधारेति इतिपर्यन्तो भागः)।

**Bibliography**

1.दीपिका टीका, शिवदत्तमिश्रः। (Editor- ज्वालाप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन्)

2.बालप्रिया टीका, प्रो. के रामपिषारटि (Editor- Dr. S. Anil Kumar, Unpublished - Publishing shortly).

3.वैयाकरणसिद्धान्तकौमुदी, श्री भट्टोजि दीक्षितः, चौखम्बा विद्याभवन्, वारणासि।

4.व्युत्पत्तिवादः, गदाधरभट्टः। (Editor- ज्वालाप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन्)

5.सर्वदर्शनसंग्रहः, माधवाचार्यः, चौखम्बा सुरभारती प्रकाशन्, वारणासि।

6.History of Indian Logic, Satheesh Chandra Vidyabhushan.

**Reference**

[1] भासते – 'भासृ दीप्तौ' – भ्वादिगणे – लटि प्रथमपुरुषे एकवचनम्। धा.सं.625

[2] आकाङ्क्षा। संसर्गस्य मर्यादा – 'भानं' – यतः इति व्युत्पत्तेः।

[3] प्रकारता – विशेषणता।

[4] अवच्छिन्नत्वम् - अवच्छेदकतावत् पदार्थः। घटत्वावच्छिन्नः घटः।

[5] अवच्छेदकत्वम् – अन्यूनानतिरिक्त व्यक्तिधर्मत्वम्।